## आनि लोट् । (१६/२२३१)

[1]आनि इत्येतस्य लोडादेशस्य उपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति । प्रवपाणि । परिवपाणि । [2]प्रयाणि । परियाणि । लोट् इति किम् ? प्रवपानि मांसानि ॥

## नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च । (१७/२२८८)

[3]नि इत्येतस्य उपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति गद नद पत पद घु मा स्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति देग्धि इत्येतेषु परतः । गद – प्रणिगदति । परिणिगदति । नद – प्रणिनदति । परिणिनदति । पत – प्रणिपतति । परिणिपतति । पद – प्रणिपद्यते । परिणिपद्यते । घु – प्रणिददाति । परिणिददाति । प्रणिदधाति । परिणिदधाति । माङ – प्रणिमिमीते । परिणिमिमीते । मेङ् – प्रणिमयते । परिणिमयते । मा इति माङ्मेङोर्ग्रहणमिष्यते । स्यति – प्रणिष्यति । परिणिष्यति । हन्ति – प्रणिहन्ति । परिणिहन्ति । याति – प्रणियाति । परिणियाति । वाति – प्रणिवाति । परिणिवाति । द्राति – प्रणिद्राति । परिणिद्राति । प्साति – प्रणिप्साति । परिणिप्साति । वपति – प्रणिवपति । परिणिवपति । वहति – प्रणिवहति । परिणिवहति । शाम्यति – प्रणिशाम्यति । परिणिशाम्यति । चिनोति – प्रणिचिनोति । परिणिचिनोति । देग्धि – प्रणिदेग्धि । परिणिदेग्धि । अड्व्यवायेऽपि नेर्गदादिषु णत्वमिष्यते । प्रण्यगदत् । परिण्यगदत् ॥

## शेषे विभाषाऽकखादावषान्त उपदेशे । (१८/२२३२)

[4]नेः इति वर्तते, उपसर्गात् इति च । अककारादिरखकारादिरषकारान्तः च उपदेशे यो धातुः स शेषः, तस्मिन् परतः उपसर्गस्थान्निमित्तात् उत्तरस्य नेः नकारस्य विभाषा णकार आदेशो भवति । प्रणिपचति, प्रनिपचति[5] । प्रणिभिनत्ति, प्रनिभिनत्ति । अकखादौ इति किम् ? प्रनिकरोति । प्रनिखादति[6] । अषान्त इति किम् ? प्रनिपिनष्टि । उपदेशग्रहणं किम् ? इह च प्रतिषेधो यथा स्यात्, प्रनिचकार, प्रनिचखाद, प्रनिपेक्ष्यति इति । इह च मा भूत्, [7]प्रणिवेष्टा । प्रणिवेक्ष्यति ॥

## अनितेः । (१९/२४७८)

[8]अनितेः [9]नकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति । प्राणिति । पराणिति ॥

---

1. उपसर्गात् इति वर्तते इत्यधिकम् क, उपसर्गस्थादित्येव इत्यधिकम् इ. 2 प्रयाणि नास्ति क. 3. उपसर्गात् इति वर्तते इत्यधिकम् ब, निउपसर्गस्थात् उत्तरस्य क. ड. 4. वाक्यमिदं नास्ति ब, उपसर्गात् इति वर्तते क. 5. परिणिपचति परिनिपचति इत्यधिकम् इ. 6. प्रतिखनति इत्यधिकम् इ. 7. विशेः – इत्यधिकम् ब, प्रनिवेष्टा परिनिवेष्टा प्रणिवेष्टा परिणिवेष्टा परिणिवेष्टति प्रणिवेक्ष्यति क. 8. उपसर्गात् इति वर्तते इत्यधिकम् क. 9. इत्येतस्य इत्यधिकम् इ.